# वैदिकी पर्यावरणप्रक्रिया

**बालकृष्ण एम. दवे**
शोधार्थी, संस्कृत विभाग
अपेक्स यूनिवर्सिटी, जयपुर

आधुनिकवैज्ञानिकविकासस्य परिणामस्वरूपं वर्तमाने सम्पूर्णं विश्वं विनाशोन्मुखं लक्ष्यते। पुनरपि वयं मानवा: नवनवैर्वैज्ञानिकाविष्कारै: तकनीकी प्रयोगैश्च विनाशकारकपदार्थानामेव प्रयोगेउपयोगे च लग्नाः स्म। विनाशोन्मुखिप्रवृत्तिरेतावती भयावहा वर्तते यत् पृथिव्या अस्तित्वमपि संकटग्रस्तं दृश्यते। वैश्विकोष्माप्रसारोऽपि जीवानां कृते पर्याप्तं घातुको वर्तते। पर्यावरणं प्रकृतिदोषापन्नत्वात् कथं हितकरं स्यादिति चिन्तनीयमस्ति। राजनेतारो वैज्ञानिका विद्वांसश्च बहुकालादस्मिन् विषये चिन्तनशीलाः सन्ति। उपायान्वेषणे च लग्नाः सन्तिकिन्तु ते सफला भविष्यन्ति न वेति संशयास्पदमेवास्ति यतो हि ते वैज्ञानिकविकासावरोधमपि नैव वांछन्ति, न च तकनीकी विकासावरोधमेवेच्छन्ति। अस्यां स्थितौ अयं प्रश्न: समुदेति यत् आधुनिकविज्ञानविदां चिन्तने जीवनदृष्टिः किंविधाऽस्ति। मानवीया जीवनशैली कीदृशी स्यात् कथं च निर्बाधप्रवाहमयी स्यात् इत्येतद्विधं चिन्तनं सम्भवतस्तेषां मस्तिष्केऽनुपपन्नमेव। अत्रास्माकीनं चिन्तनं त्विदं वर्तते यत् यावदद्यतनीयायां मानवीयजीवनशैल्यां वाञ्छनीयम् आधारभूतं परिवर्तनं न भविता तावत् पर्यावरणसंरक्षणस्य जीवसंरक्षणस्य पृथिव्या: संरक्षणस्य च नास्माकं संकल्प: फलीभूतो भवेत्।

**वेदोक्तं देवविज्ञानम् पर्यावरणं च**

समसामयिकं वैश्विकपरिदृश्यं विलोक्य स्वाभाविकरूपेणेयं जिज्ञासा समुदेति यत् आधुनिकविज्ञानद्वारा मानवेभ्य: प्रदत्ताया जीवनशैल्या किं विकल्पोऽस्ति। यदा वयमस्य विकल्पस्य अन्वेषणाय प्रवृत्ता भवामः सूक्ष्मतया विचारयामश्चेदेषां जिज्ञासा अनायासमेवास्मान् वेदविज्ञानमवगन्तुं प्रेरयति। वेदे यद् विज्ञानमस्ति तल्लोकानां कृते परमकल्याणकारी वर्तते इति तथ्यं एकोनविंश्यां शताब्द्यामेव पं. मधुसूदन ओझा महोदयै: स्वकीयग्रन्थेषु वैशद्येन स्पष्टीकृतम्। वेदविज्ञानं वस्तुतो देवानां विज्ञानमस्ति। देवतत्त्वं एकमात्रम् एतादृशं तत्त्वमस्ति यद्धि स्वयमेव सृष्टेरुत्पादकं नियामकं संहारकं चास्ति। वर्तमाने देवतत्त्वविषये जनसामान्यो भ्रान्त एवास्ति। यतो हि स वेदविज्ञानादनभिज्ञोऽस्ति। वस्तुतस्तु देवा: सूर्यरश्मयः एव सन्ति। सूर्यरश्मीणां यद्विज्ञानमस्ति तदेव वेदे सन्निहितमस्ति। सूर्यः एकस्मिन् वर्षे षष्ट्युत्तरनवशतसंख्याकप्रकारा रश्मी: प्रसारयति। ता रश्मय एव समग्रं सांसारिकं कार्यकलापं संचालयन्ति।

सूर्यातिरिक्तग्रहाणां रश्मयोऽपि सहयोगिन्यो भवन्ति। नक्षत्राणां तारकाणां चापि रश्मय एषां देवानां सहयोगिन्यो भवन्ति। एवं चेद् रश्मिरेव प्रधानभूतं देवसंज्ञकं तत्त्वमस्ति । इदं रश्मितत्त्वमेव सजीवानां निर्जीवानां पदार्थानां वनस्पतीनां च कारकमस्ति। यद्येतन्न स्यात्तदा संसारे पदार्थकल्पनापि नैव कर्त्तुं शक्यते। आधुनिका वैज्ञानिका अपि वेदविज्ञानस्येदं सत्यं स्वीकुर्वन्ति यत् पदार्थानामुद्भवे वृद्धौ च सूर्यरश्मीणां प्रभावोऽवश्यं भवति । वनस्पतयोऽपि सूर्यरश्मिभिरेवाङ्.कुरिता: पल्लविता: समृद्धाश्च भवन्ति। अनेन स्पष्टीभवति यत् वेदोक्तं देवतत्त्वमेव विश्वपर्यावरणस्य मूलकारकमस्ति। इदं चादित्ये समाहितमस्ति, अतएव वेदा: आदित्यं सनातनब्रह्मरूपेण प्रतिपादयन्ति।

वेदविज्ञानस्य गूढरहस्यवेत्तृणां मतानुसारं देवसंज्ञका विशिष्टा प्राणशक्ति: सूर्यादिग्रहाणां नक्षत्राणां तारकाणां च रश्मिषु वैविध्येन गूढा भवति। सा शक्तिरेव स्वीयवैविध्येन वैविध्यपूर्णमखिलंजगत्प्रपंचं रचयति। संसारस्य सर्वे पदार्था तया प्राणशक्त्या अनुप्राणिता:सन्ति । एवं चेत् कश्चिदपि सांसारिकपदार्थ: देवहीन : प्राणहीनो वा नास्तीति वेदज्ञा: कथयन्ति । आधुनिका वैज्ञानिका जडपदार्थेषु निष्प्राणत्वं प्रवदन्ति, किन्तु वेदविज्ञानवादिन: कथयन्ति यदेतद् आधुनिकवैज्ञानिकानामल्पज्ञतैवास्ति। यतो हि यथा सजीवेनोच्चारिता वाक् वायुं समाश्रित्य अन्यत्र श्रूयते तेन स्पष्टमेवास्ति यत् वाक्प्राणं वायुर्धारयति। एवं चेत्कथं तस्य निष्प्राणत्वं वक्तुं शक्यते । जडपदार्थेषु प्राणाभावे कथं मिथ: संघटने शब्दादयो भवन्ति। कथं च तेषामप्यन्तः रश्मीणां प्रवेशो निस्सरणं च सम्भवत:। एवं बहव: प्रश्नावर्तन्ते येन विषयोऽयं जिज्ञास्यः प्रतीयते। अत्र केवलमिदमेव निष्कृष्टं वक्तुं शक्यते यत् पर्यावरणमपि देवतत्त्वरहितं नास्ति। यतो हि अस्तिकायादीनि भूतानि पर्यावरणं प्रभावयन्ति । आदित्यादिग्रहनक्षत्रतारकाणां रश्मयोऽपि पर्यावरणं प्रभावयन्ति। देवप्राणत्वेनैता रश्मय: पर्यावरणमुपकुर्वन्ति।

**त्रयोलोकस्त्रयो देवा:**

वेदे लोकत्रयस्योल्लेखोऽस्ति-भूलोक:, भुवर्लोक: स्वर्लोकश्च। एषु यो भूलोक: स अस्माकं दृश्यमाना इयं पृथिवी एवास्ति। भुवर्लोकश्चान्तरिक्षं वर्तते। भुवः परिधेर्बहि: शून्यं यदपि लक्ष्यते तदेवान्तरिक्षमितिद्वितीयलोकत्वेनोपकल्पितम्। अन्तरिक्षादुपरि यत्र आदित्यस्तपति सः स्वर्लोकः आकाशसंज्ञयाप्याधुनिकैर्व्यवह्रियते। इदं लोकत्रयमेकस्मिन् ब्रह्माण्डे संस्थितमस्तीति मन्तव्येऽपि नास्ति काचन विप्रतिपत्तिः।

ब्रह्माण्डमेव पर्यावरणस्य क्षेत्रम्। तात्पर्यमिदमस्ति यत् पर्यावरणं पृथ्वीपर्यन्तमेव सीमितं नास्ति, यतो हि पर्यावरणीय अध्ययनाय क्षेत्रविशेषस्य सीमारेखाया निर्धारणं नाद्यावधि विहितं न च विधातुं शक्यते। ब्रह्माण्डीया सर्वा घटना: एकस्मिन् सुनिश्चिते एव पर्यावरणे सम्भवन्ति। प्राकृतिका आपद: पृथिव्याम् अन्तरिक्षे स्वर्लोकं च कुत्रापि भवितुं शक्नुवन्ति । अनेन स्वयमेव सिद्ध्यति यत् त्रैलोक्यमेव पर्यावरणस्यागारम्। पर्यावरणे एव प्राणानां संस्थितिर्भवति । यत्र

पर्यावरणं नास्ति तत्र प्राणशक्तिरपि नैव स्थातुं शक्नोति।

पार्थिव पर्यावरणे पृथिवी एव अस्याः प्राणशक्तेरधिष्ठात्री भवति। तस्मादेव वैदिकर्षिः कथयति-

**"माता भूमिः पुत्रोऽहं पृथिव्याः" इति।**

आधुनिकवैज्ञानिका भूमिं जडां मन्वते, किन्तु वैदिका भूमिं प्राणवतीं मन्वते। अतएव तैः 'माता' शब्देन पृथिव्याः संज्ञपनं कृतम्। वेदविज्ञानवादिनः कथयन्ति यत्पृथिव्यां अग्निः प्राणरूपेण विद्यमानो भवति। अन्तरिक्षे वायुः प्राणरूपेण विद्यमानो भवति। स्वर्लोके च आदित्यः प्राणरूपेण विद्यमानो भवति। ग्रहनक्षत्रतारकाणां रश्मयः इमान् प्राणान् बलं प्रददति परिणामस्वरूपं इमे प्राणाः सततं सक्रिया भवन्ति। अमीषामस्तित्वं चापि शाश्वतिकतामाप्नोति। तत्परिणामस्वरूपमेव प्राणिनो पशवो वनस्पतयः जडपदार्थाश्चोत्पद्यन्ते। रश्मिप्राणयोर्निर्बाधप्रवाहेणैव पर्यावरणीया प्रक्रिया प्रचलति । एषा पर्यावरणीया प्रक्रिया सर्वदा सततं प्रवहमाना भवति चेन्न कश्चिदपि पदार्थो बाधाग्रस्तो भवति किन्तु यदास्यामवरोधो विश्रृंखलनं वैषम्यं वा समायाति तदैव पर्यावरणीयः संकटः समुपस्थितो भवति।

**देवानुकूलनमेव पर्यावरणीयानुकूलनम्**

प्राणिनां प्राणरक्षणाय पर्यावरणस्यानुकूलनं पर्यावरणविदां मतेन अपेक्षणीयं भवति । ये प्राणिनः पर्यावरणेन सह अनुकूलनं स्थापयितुम् अक्षमा भवन्ति तेषां जीनं संकटग्रस्तं भवति। वेदविज्ञाने पर्यावरणीयानुकूलनदृष्ट्यैवोक्तं यत् 'अदितिः स माता स पिता स पुत्रः' इति। अदितिः प्रकृतिरस्ति सैव सर्वेषां प्राणिनां जीवनसर्वस्वमस्ति । यत्र प्रकृतिरस्ति तत्रैव पर्यावरणं भवति। प्रकृतेश्च पोषणाय यज्ञः सर्वाधिकमुपयुक्तं साधनं प्रतिपादितम्। तेन विशुद्धा प्रकृतिः विशुद्धं पर्यावरणमाविर्भावयति। प्रकृत्याः या कार्यप्रणाली विद्यते सैव प्राणिभ्यो जीवनचर्यायै ग्राह्या इति वेदविज्ञानविदो वदन्ति। तन्मतेन प्रकृतिरेव मानवीयजीवनविज्ञानस्य प्रयोगशाला अस्ति। प्रकृतावेव मानवता परीक्ष्यते।अपि च वैज्ञानिकदृशा दिग्देशकालावच्छिन्नाः सर्वे पदार्थाः दिग्देशकालावच्छिन्नया प्रकृत्यैव जीवनादारभ्य सक्रिया भवन्ति, जीवनं जीवयन्ति, जीवनपर्यन्तं प्रकृतिस्तेषामुपकारिणी भवति, अतएव पर्यावरणीयमनुकूलनं कदापि विश्रृंखलितं न स्यादिति प्राणिभ्य उपदिशति यत् ते एतदर्थं सर्वदा सावधाना भवेयुः।

पर्यावरणीयानुकूलनाय त्रयो देवा अभ्यर्च्याःस्तोष्याश्चाभिमताः। तत्र प्रथमो देवोऽग्निः। स उष्मणा सहिष्णुतां शास्ति। प्राणिनः सहिष्णवो भवेयुः । असहिष्णुर्न जीवति न च जीवितुं शक्नोति। पर्यावरणे उष्माणं सोढुं बालातपसेवनं श्रेष्ठ उपायः। यदि प्राणी दैनिकरूपेण बालातपं सेवते तदा सूर्यतापं सोढुं सक्षमो भवति। द्वितीयो वायुर्देवः। स ग्रीष्मे उष्मणा शीते च शैत्येन ग्रस्तो भवति। प्राणी ग्रीष्मे उष्णं वायुं शीते च शैत्यं वायुं सेवितुं सक्षमो भवेत् । न चेत् कथमनुकूलनम् आप्नुयात्।

तृतीयो देव आदित्य:। स एव सर्वेषां प्राणिनां प्राणदाता। यथा यथा आदित्य: प्रवर्तेत तथा तथा प्रवर्त्तितव्यम्। तेन आदित्यमाधारीकृत्य दिनचर्या जीवनचर्या च निर्धारिणीये। तदैव मानवा: जीवनं व्यष्ठातुं क्षमन्ते।

एते त्रयो देवा एव स्वरूपभेदात् त्रयस्त्रिंशत् संजायन्ते । तत्र अग्नेरष्टाभि:रूपैः अष्टौ वसवः जायन्ते। वायोरेकादशभिः रूपैरेकादशरुद्रा जायन्ते। आदित्यस्य द्वादशभिः रूपैर्द्वादशादित्या जायन्ते।

**आधारभूते भौतिकं तत्त्वम् अग्निः**

सर्वेषु पञ्चमहाभूतेषु प्राथमिकं तत्त्वं अग्निर्महाभूतः स्वीकृतः । अयम् अग्निरेव पृथिव्या देवताऽभिमतः। अन्यदेवानामिवास्याप्यग्नेस्त्रीणि स्वरूपाणि सन्ति । तत्र अधिभौतिकोऽग्निरिति प्रथमं स्वरूपम्। आधिदैविकोऽग्निरिति द्वितीयं स्वरूपम्। अध्यात्मिकोऽग्निरिति तृतीयं स्वरूपम्। वर्तमाने वयम् अग्नेर्यत्स्वरूपं पश्यामस्तदग्नेराधिभौतिकं स्वरूपमस्ति। इदमपि आधिभौतिकं स्वरूपं पर्यावरणविषये चिन्तनीयम्। अयं आधिभौतिको अग्निः शुद्धपदार्थेन शुद्धो भवति, अशुद्ध पदार्थेन चाशुद्धो भवति। एवं चेदस्मिन् अग्नौ शुद्धपदार्था: एव दग्धव्या होतव्याश्च। न च कदाचिदपि अशुद्धपदार्था: दग्धव्या हव्या वा। अशुद्धपदार्थानामशुद्धिरेवाग्निना ज्वलनारन्तरं निस्सरति, तेन च पर्यावरणम् अशुद्धं भवति। एवमेव शुद्धपदार्थानां शुद्धिरप्यग्निना निस्सृता सती पर्यावरणं शोधयति। अनेनैवाग्नौ ओषधीनां हवनस्य घृतस्य हवनस्य च महत्ता स्वयमेव स्प भवति।

सूर्ये आदित्यप्राणरूपेणयो ऽग्निर्विद्यते सोऽग्ने राधिदैविकं स्वरूपम्। प्राकृतयज्ञे अस्यैवाधिदैविकस्याग्नेरुपयोगो भवति । अन्तरिक्षे वायौ प्रच्छन्नरूपेण विद्यमान: सोमोऽस्य हविर्द्रव्यं भवति । सोमस्याहुतिः सूर्यरश्मिस्वरूपैर्देवैर्विधीयते। तस्याहुतेः परिणामस्वरूपं पर्जन्यानामाविर्भावो भवति। पर्जन्या: अपि रश्मिवन्तो भवन्ति । पर्जन्यरश्मयः सूर्यरश्मिवन्तो भवन्ति । साहाय्येन जलमुद्भावयन्ति। एतानि जलान्येव स्थायिरूपेण भुवा लभ्यते। बलं प्राप्तुं च सर्वे प्राणिनः जलं पिबन्ति दृश्यजगतो बाह्यप्रकृतिं च द्रष्टुं समर्था भवन्ति । अतएवोक्तम्

**"अपो हि ष्ठा मयो भुवस्ता न अर्जे दघातन।**

**महेरणाय चक्षसे।"इति।**

पृथिव्या देवत्वादग्निरयं भूनिष्ठ एव मूलतो विज्ञातव्यः। यदाधिदैविकोऽग्निः भूमिं प्रविश्य स्वामित्वं प्राप्तवान्। अस्याग्ने: स्वरूपाद्वयं वेदविज्ञाने प्रतिपादितम्- चित्याग्निः चितिनिधेयाग्निश्च । योऽग्निः पिण्डे ओतप्रोतश्च भवति सः चित्याग्निसंज्ञया उक्तः । यश्चाग्नि: पिण्डाद् अभितस्तत्तेजोरूपेण संस्थितो भवति सः चितिनिधेयाग्निरुच्यते । अग्नेर्यत् चितिनिधेयं स्वरूपं पिण्डमभितस्तेजोमण्डारूपेण प्रसरति तत्केवलं भूपिण्डं यावत् सीमितं नास्ति अपितु सूर्यपर्यन्तं

प्रयाति । भूपिण्डस्य तेजोमयमिदं मण्डलमेव प्रध नात् पृथिवीत्युच्यते। एवं चेत् भूपिण्डं केवलं दृश्यमाना पृथ्वी अस्ति, किन्तु पृथ्वी शब्देन भूपिण्डातिरिक्तं तदीयतेजोमण्डलस्यापि ग्रहणं भवतीत्युभयोर्भेदो विद्यते।

भूपिण्डे यो अग्निरस्ति तस्य मर्त्याग्निरिति संज्ञाऽस्ति,किन्तु पृथिव्यां योऽग्निरस्ति तस्य अमृताग्निरिति संज्ञाऽस्ति। आधुनिकविज्ञानस्य भाषायां पृथिवी भूपिण्डस्य पर्यावरणमस्ति । भूपिण्डपृथिव्योरुभयो: परस्परं गहनसम्बन्धो भवति यतो हि भूपिण्डस्य सत्ता तदीयतेजोमण्डलरूपिण्या: पृथिव्या अभावे नैव सम्भवति।एवमेव पृथिवीरूपं तेजोमण्डलमपि विना भूपिण्डं न स्थातुं शक्नोति। अतएवाधुनिकपर्यावरणविदां चिन्तकानां च चिन्तनमिदं पर्याप्तं उचितं प्रतीयते यत् पर्यावरणस्य क्षत-विक्षतायामवस्थायां भूपिण्डस्य अस्तित्वे अपि संकटम्उपस्थास्यते। अतएव पर्यावरण संरक्षणाय तदभिवृद्धौ च प्रयत्ना विधेयाः।

**आधारभूतं भौतिकतत्त्वं जलम्**

जलतत्त्वमपि व्यापकं तत्त्वमस्ति। द्युलोकात्पृथिवीपर्यन्तं त्रैलोक्ये सर्वत्र जलमुपलभ्यते। द्युलोकतः परे विद्यमानाः सूक्ष्मजलीयपरमाणवः 'अम्भ' इति संज्ञया उच्यन्ते । सूर्यरश्मिषु व्याप्तं जलं 'मरीचि' संज्ञया उच्यते। पृथिव्यां विद्यमानं जलं 'मर' संज्ञयोच्यते। भूगर्भे विद्यमानं जलं 'आप:' इति संज्ञया उच्यते। ओषधीषु वनस्पतिषु च अग्निगर्भं जलं विद्यमानं भवति अथवा चास्मिन् जले एवाग्निरोषधयश्च सूक्ष्मतया विद्यन्ते येन जलप्रवर्षणमात्रेण भूमिर्वनस्पतीन्ओषधीश्च प्रादुर्भावयति।

उक्तञ्च यजुर्वेदे-

**“गर्भोऽस्यौषधीनां गर्भो वनस्पतीनाम् ।**

**गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ३॥"**

जलं सोमस्येव विकारोऽस्ति । तस्मादेव चेदममृतमयं भवति । इदमेव प्राणिषु वनस्पतिषु औषधीषु च रसशक्तिमुत्पादयति। तया रसशक्त्यैव प्राणिन ओषधयश्च शरीराणि पोषयन्ति। बृहज्जाबालोपनिषदि अस्य स्वरूपमेवमुक्तं-

**'शक्ति: सोमो अमृतमयो रसशक्तिकरी तनूः।"**

ब्रह्मणः पंचसु प्रकृतिषु प्राणानन्तरमस्यैव गणना विहिता। यथा-प्राणआपः वाक् अन्नाद: अन्नं चेति पंच ब्रह्माणि महतयः।एषा जलप्रकृतिः निसर्गतः सौम्या भवति। वायौ जलस्य विद्यमानता तं वायुमपि सौम्यं विदधाति। सौम्यो वायुरेव शिव: शंकर: , कल्याणकरो भवति। वेदविज्ञाने सोम्यवायो:. संशमन इतिसंज्ञा उक्ता। सर्वएव हि क्षोभा:

शिववायुयोगात्संशाम्यन्ति। वस्तुतस्तु जलमेव तत्र प्रभावं जनयति। अतएवोक्तं तैत्तिरीय ब्राह्मणे-

**"या दिव्या आप: पयसा सम्बभूवु**

**र्या अन्तरीक्ष्या उत पार्थिवीर्या:।**

**हिरण्यवर्णा यज्ञियास्ता न आपः**

**शिवा: शं स्योना: सुहवा भवन्तु१।। "**

श्वेताश्वतरोपनिषदि जलस्य पञ्चस्रोतसामुल्लेखो विद्यते।यथा -

**"पञ्चस्रोतोऽम्बुं पञ्चयोन्युग्रवक्रां,**

**पञ्चप्राणोर्मे पञ्चबुद्ध्यादिमूलान्।**

**पञ्चाशद्भेदां पञ्चपर्वामधीम:२।।"**

अव अम्बूनां जलानां यानि पंच स्रोतांसि संकेतितानि तानि वर्तन्ते परमेष्ठी, मरीचयः, पर्जन्यः, पृथिवी, भूगर्भश्च। अर्थात् जलानां मूलस्रोत: परमेष्ठी अस्ति अतएव परमेष्ठिलोके सोमरूपेण जलस्य स्थितिर्भवति मरीचय: सूर्यरश्मयो भवन्ति ते सोमस्य संवहनात् जलमय्यो भवन्ति। पर्जन्य: वायु द्वारा जलानि संहत्य वृष्टिजलं निर्माति। पृथिवी वृष्टि जलस्य संधारणं करोति। सन्धृतवृष्टिजलमेव भूगर्भं प्रयाति, भूगर्भे पूर्वतोविद्यमानजलेन सह मिश्रीभूय तज्जलं सविशेषं विशुद्धं बल्यं च भवति। भूगर्भीयजलेनैव वनस्पतयोऽनुप्राणिता भवन्ति। पृष्टिजलेन तेषामाविर्भावो भवति। पार्थिवं जलमेव प्राणिभि: पेयं भवति। एवं जलं पर्यावरणे प्राणिकल्याणायैव प्रवर्तमानमस्ति। अतएवोक्तं-

**"पय: पृथिव्यां पय ओषधीषु"**

वस्तुतो जलस्यैतादृशीमुपयोगितां दृष्ट्वैव जलसंरक्षणाय प्रवर्तितव्य मिति पर्यावरणविदो वदन्ति।